॥ गोपालसहस्रनामप्रारंभः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीगणेशायनमः ॥ पार्वत्युवाच ॥ कैलासशिखरेरम्येगौरीपृच्छ
तिशंकरम् ॥ ब्रह्मांडाखिलनाथस्त्वंसृष्टिसंहारकारकः ॥१॥ त्व
मेवपूज्यसेलोकैर्ब्रह्मविष्णुसुरादिभिः ॥ नित्यंपठसिदेवेशकस्य
स्तोत्रंमहेश्वर ॥ २ ॥ आश्चर्यमिदमत्यंतंजायतेममशंकर ॥ तत्प्रा
णेशमहाप्राज्ञसंशयंछिंधिशंकर ॥ ३ ॥ श्रीमहादेवउवाच ॥ ध
न्यासिकृतपुण्यासिपार्वतिप्राणवल्लभे॥ रहस्यातिरहस्यंचयत्पृच्छ
सिवरानने ॥ ४ ॥ स्त्रीस्वभावान्महादेविपुनस्त्वंपरिपृच्छसि ॥
गोपनीयंगोपनीयंगोपनीयंप्रयत्नतः ॥ ५ ॥ दत्तेचसिद्धिहानिः
स्यात्तस्माद्यत्नेनगोपयेत् ॥ इदंरहस्यंपरमंपुरुषार्थप्रदायकम् ॥
॥ ६ ॥ धनरत्नौघमाणिक्यतुरंगमगजादिकम् ॥ ददातिस्मरणा
देवमहामोक्षप्रदायकम् ॥ ७ ॥ तत्तेऽहंसंप्रवक्ष्यामिशृणुष्वावहिता
प्रिये ॥ योसौनिरंजनोदेवश्चित्स्वरूपीजनार्दनः ॥८॥ संसारसा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गरोत्तारकारणायसदानृणाम्॥ श्रीरंगादिकरूपेणत्रैलोक्यंव्याप्य
तिष्ठति ॥ ९ ॥ ततोलोकामहामूढाविष्णुभक्तिविवर्जिताः ॥
निश्चयंनाधिगच्छंतिपुनर्नारायणोहरिः ॥ १० ॥ निरंजनो
निराकारोभक्तानांप्रीतिकामदः ॥ वृंदावनविहारायगोपालंरू
पमुद्वहन् ॥ ११ ॥ मुरलीवादनाधारीराधायैप्रीतिमावहन् ॥
अंशांशेभ्यःसमुन्मील्यपूर्णरूपकलायुतः ॥ १२ ॥ श्रीकृष्णचंद्रो
भगवान्नंदगोपवरोद्यतः ॥ धरणीरूपिणीमातायशोदानंददायि
नी ॥ १३ ॥ द्वाभ्यांप्रयाचितोनाथोदेवक्यांवसुदेवतः ॥ ब्रह्म
णाभ्यर्थितोदेवोदेवैरपिसुरेश्वरि ॥ १४ ॥ जातोऽवन्यांमुकुंदो
पिमुरलीवेदरेचिका॥ तयासार्द्धंवचःकृत्वाततोजातोमहीतले ॥
॥ १५ ॥ संसारसारसर्वस्वंश्यामलंमहदुज्ज्वलम् ॥ एतज्ज्योति
रहंवेद्यंचिंतयामिसनातनम् ॥१६ ॥ गौरतेजोविनायस्तुश्यामते

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रहवद्यो चतथा मिसनोतनम् ॥ १६ ॥ गौरतेजोविनायस्तुश्यामत

जःसमर्चयेत् ॥ जपेद्वाध्यायतेवापिसभवेत्पातकीशिवे ॥ १७ ॥
सब्रह्महासुरापीचस्वर्णस्तेयीचपंचमः ॥ एतैर्दोषैर्विलिप्येततेजो
भेदान्महेश्वरि ॥ १८ ॥ तस्माज्ज्योतिरभूद्द्वेधाराधामाधवरूपकम् ॥
तस्मादिदंमहादेविगोपालेनैवभाषितम् ॥ १९ ॥ दुर्वाससोमुनेर्मो
हेकार्तिक्यांरासमंडले ॥ ततःपृष्टवतीराधासंदेहभेदमात्मनः ॥
॥ २० ॥ निरंजनात्समुत्पन्नंमयाऽधीतंजगन्मयि ॥ श्रीकृष्णे
नततःप्रोक्तंराधायैनारदायच ॥ २१ ॥ ततोनारदतःसर्वंविरला
वैष्णवास्तथा ॥ कलौजानंतिदेवेशिगोपनीयंप्रयत्नतः ॥ २२ ॥
शठायकृपणायाथदांभिकायसुरेश्वरि ॥ ब्रह्महत्यामवाप्नोतित
स्माद्यत्नेनगोपयेत् ॥ २३ ॥ अस्यश्रीगोपालसहस्रनामस्तोत्र
मंत्रस्य ॥ श्रीनारदऋषिः ॥ अनुष्टुप्छंदः ॥ श्रीगोपालोदेवता ॥
कामोबीजम् ॥ मायाशक्तिः ॥ चंद्रःकीलकं ॥ श्रीकृष्णचंद्रभक्ति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गो० ३

रूपफलप्राप्तये श्रीगोपालसहस्रनामजपेविनियोगः ॥ अथवा ॥ ॐ ऐंक्लींबीजं ॥ श्रींह्रींशक्तिः ॥ श्रीवृंदाविननिवासाःकीलकम् ॥ श्रीराधाप्रियंपरंब्रह्मेतिमंत्रः ॥ धर्मादिचतुर्विधपुरुषार्थसिद्ध्यर्थे जपेविनियोगः ॥ ॐ क्लांअंगुष्ठाभ्यांनमः ॥ ॐ क्लींतर्जनीभ्यां नमः ॥ ॐ क्लूंमध्यमा० ॥ ॐ क्लैंअनामिका० ॥ ॐ क्लौंक निष्ठिका० ॥ ॐ क्लुः करतलकरपृष्ठाभ्यांनमः ॥ ॐ क्लांहृद याय० ॥ ॐ क्लींशिरसेस्वाहा ॥ ॐ क्लूंशिखायैव० ॥ ॐ क्लैंकवचायहुं ॥ ॐ क्लौंनेत्रत्रयायवौषट् ॥ ॐ क्लुःअस्त्रायफट् ॥ अथध्यानम् ॥ कस्तूरीतिलकंललाटपटलेवक्षःस्थलेकौस्तुभं नासाग्रेवरमौक्तिकंकरतलेवेणुंकरेकंकणम् ॥ सर्वांगेहरिचंदनं सुललितंकंठेचमुक्तावलिं गोपस्त्रीपरिवेष्टितोविजयतेगोपाल चूडामणिः ॥ १ ॥ फुल्लेंदीवरकांतिबिंदुवदनंबर्हावतंसप्रियं

स० ३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चूडामणिः ॥ १ ॥ फुल्लेंदीवरकांतिबिंदुवदनंबर्हावतंसप्रिय
श्रीवत्सांकमुदारकौस्तुभधरंपीतांबरंसुन्दरम् ॥ गोपीनांनयनो
त्पलार्चिततनुंगोगोपसंघावृतं गोविंदंकलवेणुवादनपरंदिव्यां
गभूषंभजे ॥ २ ॥ इतिध्यानम् ॥ ॐ क्लींदेवःकामदेवःकामबी
जशिरोमणिः ॥ श्रीगोपालोमहीपालःसर्ववेदांतपारगः ॥ १ ॥
धरणीपालकोधन्यःपुंडरीकसनातनः ॥ गोपति ॥ १० ॥ भूप
तिःशास्ताप्रहर्ताविश्वतोमुखः ॥ २ ॥ आदिकर्तामहाकर्तामहा
कालःप्रतापवान् ॥ जगज्जीवोजगद्धाता ॥ २० ॥ जगद्धर्ताजग
द्वसु ॥ ३ ॥ मत्स्योभीमःकुहूभर्तार्हर्तावाराहमूर्तिमान् ॥ नारायणो
हृषीकेशोगोविंदो ॥ ३० ॥ गरुडध्वजः ॥ ४ ॥ गोकुलेंद्रोमहाचं
द्रःशर्वरीप्रियकारकः ॥ कमलामुखलोलाक्षःपुंडरीकशुभाव
हः ॥ ५ ॥ दुर्वासाःकपिलोभौमःसिंधुसागरसंगमः ॥ ४० ॥
गोविंदोगोपतिर्गोत्रःकालिंदीप्रेमपूरकः ॥ ६ ॥ गोपस्वामीगो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गो० कुलेंद्रोगोवर्द्धनवरप्रदः ॥ नंदादिगोकुलत्रातादातादारिद्र्यभं स०
जनः ॥ ५० ॥ ७ ॥ सर्वमंगलदाताचसर्वकामप्रदायकः ॥
४ आदिकर्तामहीभर्तासर्वसागरसिंधुजः ॥ ८ ॥ गजगामीगजो
द्धारीकामीकामकलानिधिः ॥ कलंकरहितश्चंद्रो ॥ ६० ॥
बिंबास्योबिंबसत्तमः ॥ ९ ॥ मालाकारःकृपाकारःको
किलास्वरभूषणः ॥ रामोनीलांबरोदेवोहलीदुर्दममर्दनः ॥७०॥
॥१०॥ सहस्राक्षपुरीभेत्तामहामारीविनाशनः ॥ शिवःशिवतमो
भेत्ताबलारातिप्रपूजकः॥११॥ कामारीवरदायीचवरेण्योमीनके
तनः॥नरो॥८०॥ नारायणोधीरोराधापतिरुदारधीः ॥ १२ ॥
श्रीपतिःश्रीनिधीःश्रीमान्मापतिःप्रतिराजहा॥वृंदापतिः ९०॥
कुलग्रामीधामीब्रह्मसनातनः ॥ १३ ॥ रेवतीरमणोरामश्चंचल ४
श्रारुलोचनः ॥ रामायणशरीरोऽयंरामी ॥ १०० ॥ रामश्रियः
CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पतिः ॥ १४ ॥ शर्वरःशर्वरीशर्वःसर्वत्रशुभदायकः ॥ राधाराधा
यितोराधीराधाचित्तप्रमोदकः ॥ १५ ॥ राधारतिसुखोपेतो
॥ ११० ॥ राधामोहनतत्परः ॥ राधावशीकरोराधाहृदयांभो
जषट्पदः ॥ १६ ॥ राधालिंगनसंमोहोराधानर्तनकौतुकः ॥
राधासंजातसंप्रीतीराधाकामफलप्रदः ॥ १७ ॥ वृंदापतिःकोश
निधिःकोकशोकविनाशकः ॥ १२० ॥ चंद्रापतिश्चंद्रपतिश्चंड
कोदंडभंजनः ॥ १८ ॥ रामोदाशरथीरामोभृगुवंशसमुद्भवः ॥
आत्मारामोजितक्रोधोमोहोमोहांधभंजनः ॥ १९ ॥ वृषभानु
॥ १३० ॥ भवोभावःकाश्यपिःकरुणानिधिः ॥ कोलाहलोह
लीहालीहेलीहलधरप्रियः ॥ २० ॥ राधामुखाब्जमार्तंडो
॥ १४० ॥ भास्करोरविजोविधुः ॥ विधिर्विधातावरुणोवारुणो
वारुणीप्रियः ॥ २१ ॥ रोहिणीहृदयानंदोवसुदेवात्मजो ॥ १५० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गो० ५

बलिः ॥ नीलांबरोरौहिणेयोजरासंधवधोऽमलः ॥ २२ ॥
नागोनवांभाविरुदोवीरहावरदोबली ॥ १६० ॥ गोपथोविज
यीविद्वान्शिपिविष्टःसनातनः ॥ २३ ॥ परशुरामवचोग्राहीवर
ग्राहीशृगालहा ॥ दमघोषोपदेष्टाचरथग्राही ॥ १७० ॥ सुदर्श
नः ॥ २४ ॥ वीरपत्नीयशस्त्राताजराव्याधिविघातकः ॥ द्वार
कावासतत्त्वज्ञोहुताशनवरप्रदः ॥ २५ ॥ यमुनावेगसंहारीनीलां
बरधरःप्रभुः ॥ विभुःशरासनो ॥ १८० ॥ धन्वीगणेशोगणना
यकः ॥ २६ ॥ लक्ष्मणोलक्षणोलक्ष्योरक्षोवंशविनाशनः ॥ वा
मनोवामनीभूतोवमनो ॥ १९० ॥ वमनारुहः ॥ २७ ॥ यशो
दानंदनःकर्तायमलार्जुनमुक्तिदः ॥ उलूखलीमहामानीदामब
द्धाव्हयीशमी ॥२८॥ भक्तानुकारीभगवान् ॥ २०० ॥ केशवो
ऽचलधारकः ॥ केशिहामधुहामोहीवृषासुरविघातकः ॥ २९ ॥

स० ५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अघासुरविनाशीचपूतनामोक्षदायकः ॥ कुब्जाविनोदीभगवान्
॥ २१० ॥ कंसमृत्युर्महामखी ॥ ३० ॥ अश्वमेधोवाजपेयोगोमे
धोनरमेधवान् ॥ कंदर्पकोटिलावण्यश्चंद्रकोटिसुशीतलः॥३१॥
रविकोटिप्रतीकाशोवायुकोटिमहाबलः ॥ २२० ॥ ब्रह्मब्रह्मांड
कर्ताचकमलावांच्छितप्रदः ॥ ३२ ॥ कमलीकमलाक्षश्चकमला
मुखलोलुपः ॥ कमलाव्रतधारीचकमलाभःपुरंदरः ॥ ३३ ॥
सौभाग्याधिकचित्तो ॥ २३० ॥ यंमहामायीमहोत्कटः ॥ तार
कारिःसुरत्रातामारीचक्षोभकारकः ॥ ३४ ॥ विश्वामित्रप्रियो
दांतोरामोराजीवलोचनः ॥ लंकाधिपकुलध्वंसी ॥ २४० ॥
बिभीषणवरप्रदः ॥ ३५ ॥ सीतानंदकरोरामोवीरोवारिधिबं
धनः ॥ खरदूषणसंहारीसाकेतपुरवासनः ॥ ३६ ॥ चन्द्रावलीप
तिःकूलःकेशी ॥ २५० ॥ कंसवधोऽमरः ॥ माधवोमधुहामाध्वी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

माध्वीकोमाधवोमधुः ॥ ३७ ॥ मुंजाटवीगाहमानोधेनुकारि ॥ २६० ॥ धरात्मजः ॥ वंशीवटविहारीचगोवर्द्धनवनाश्रयः ॥ ॥ ३८ ॥ तथातालवनोद्देशीभांडीरवनशंखहा ॥ तृणावर्तकथा कारीवृषभानुसुतापतिः ॥ ३९ ॥ राधाप्राणसमोराधावदनाब्ज मधुव्रतः ॥ २७० ॥ गोपीरञ्जनदेवज्ञोलीलाकमलपूजितः ॥ ॥ ४० ॥ क्रीडाकमलसंदोहोगोपिकाप्रीतिरंजनः ॥ रंजकोरं जनोरंगोरंगीरंगमहीरुहः ॥ ४१ ॥ कामः ॥ २८० ॥ कामारि भक्तोऽयंपुराणपुरुषःकविः ॥ नारदोदेवलोभीमोबालोबालमु खांबुजः ॥ ४२ ॥ अंबुजोब्रह्मसाक्षी ॥ २९० ॥ चयोगीदत्तव रोमुनिः॥ ऋषभःपर्वतोग्रामोनदीपवनवल्लभः॥४३॥ पद्मनाभः सुरज्येष्ठोब्रह्मा ॥ ३०० ॥ रुद्रोहिभूषितः ॥ गणानांत्राणकर्ता चगणेशोग्रहिलोग्रही ॥ ४४ ॥ गणाश्रयोगणाध्यक्षःक्रोडीकृत

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जगत्त्रयः ॥ यादवेंद्रो ॥ ३१० ॥ द्वारकेंद्रोमथुरावल्लभोधुरी ॥
॥ ४५ ॥ भ्रमरःकुंतलीकुंतीसुतरक्षीमहामखी ॥ यमुनावरदाता
चकाश्यपस्यवरप्रदः ॥ ४६ ॥ शंखचुडवधोद्दामो ॥ ३२० ॥
गोपीरक्षणतत्परः ॥ पांचजन्यकरोरामीत्रिरामीवनजोजयः ॥
॥ ४७ ॥ फाल्गुनःफाल्गुनसखोविराधवधकारकः ॥ रुक्मिणी
प्राणनाथश्च ॥ ३३० ॥ सत्यभामाप्रियंकरः ॥ ४८ ॥ कल्पवृ
क्षोमहावृक्षोदानवृक्षोमहाफलः ॥ अंकुशोभूसुरोभामोभामको
भ्रामको ॥ ३४० ॥ हरिः ॥ ४९ ॥ सरलःशाश्वतोवीरोयदुवंशी
शिवात्मकः ॥ प्रद्युम्नोबलकर्ताचप्रहर्तादैत्यहा ॥ ३५० ॥ प्रभुः
॥ ५० ॥महाधनोमहावीरोवनमालाविभूषणः ॥ तुलसीदामशो
भाढ्योजालंधरविनाशनः ॥ ५१ ॥ शूरःसूर्योमृकंडश्चभास्करो
॥ ३६० ॥ विश्वपूजितः ॥ रविस्तमोहावह्निश्चवाडवोवडवान

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लः ॥ ५२ ॥ दैत्यदर्पविनाशीचगरुडोगरुडाग्रजः ॥ गोपीना
थो ॥ ३७० ॥ महीनाथोवृंदानाथोऽवरोधकः ॥ ५३ ॥ प्रपं
चीपंचरूपश्चलतागुल्मश्चगोपतिः ॥ गंगाचयमुनारूपो॥३८०॥
गोदावेत्रवतीतथा॥५४॥कावेरीनर्मदातापीगंडकीसरयूस्तथा ॥
राजसस्तामसःसत्वी ॥ ३९० ॥ सर्वांगीसर्वलोचनः ॥ ५५ ॥
सुधामयोऽमृतमयोयोगिनीवल्लभःशिवः ॥ बुद्धोबुद्धिमतांश्रेष्ठोवि
ष्णुर्जिष्णुः ॥ ४०० ॥ शचीपतिः ॥ ५६ ॥ वंशीवंशधरोलो
कोविलोकोमोहनाशनः ॥ रवरावोरवोरावोबालो ॥ ४१० ॥
बालबलाहकः ॥ ५७ ॥ शिवोरुद्रोनलोनीलोलांगुलीलांगु
लाश्रयः ॥ पारदःपवनोहंसो ॥४२० ॥ हंसारूढोजगत्पतिः ॥
॥ ५८॥ मोहिनीमोहनोमायीमहामायोमहामखी ॥ वृषोवृषाक
पिःकालःकालीदमनकारकः ॥ ४३० ॥ ५९ ॥ कुब्जाभाग्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रदोवीरोरजकक्षयकारकः ॥ कोमलोवारुणोराजाजलजोजल
धारकः ॥ ६० ॥ हारकःसर्वपापघ्नः ॥ ४४० ॥ परमेष्ठीपिता
महः ॥ खड्गधारीकृपाकारीराधारमणसुंदरः ॥ ६१ ॥ द्वादशार
ण्यसंभोगीशेषनागफणालयः ॥ कामःश्यामःसुखः ॥ ४५० ॥
श्रीदःश्रीपतिःश्रीनिधिःकृतिः ॥ ६२ ॥ हरिर्हरोनरोनारोनरो
त्तमइषुप्रियः ॥ ४६० ॥ गोपालीचित्तहर्ताचकर्तासंसारतार
कः ॥ ६३ ॥ आदिदेवोमहादेवोगौरीगुरुरनाश्रयः ॥ साधुर्म
धुर्विधु ॥ ४७० ॥ धाताभ्राताऽक्रूरपरायणः ॥ ६४ ॥ शेलंबी
चहयग्रीवोवानरारिर्वनाश्रयः ॥ वनंवनीवनाध्यक्षो ॥ ४८० ॥
महावंद्योमहामुनिः ॥ ६५ ॥ स्यमंतकमणिप्राज्ञोविज्ञोविघ्नविघा
तकः ॥ गोवर्द्धनोवर्धनीयोवर्द्धनीवर्द्धनप्रियः ॥ ६६ ॥ वर्द्धन्यो
वर्द्धनो ॥ ४९० ॥ वर्द्धीवार्द्धिन्यःसुमुखप्रियः ॥ वर्द्धितोवृद्धको

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वृद्धोवृंदारकजनप्रियः ॥ ६७ ॥ गोपालरमणीभर्तासांबकुष्ठ
विनाशनः ॥ रुक्मिणीहरणः ॥ ५०० ॥ प्रेमप्रेमीचंद्रावली
पतिः ॥ ६८ ॥ श्रीकर्तांविश्वभर्तांचनारायणोनरोबली ॥ ग
णोगणपतिश्चैवदत्तात्रेयो ॥५१०॥ महामुनिः ॥६९॥ व्यासो
नारायणोदिव्योभव्योभाउकधारकः॥ श्वःश्रेयसंशिवंभद्रंभावुकं
॥ ५२० ॥ भविकंशुभम् ॥ ७० ॥ शुभात्मकःशुभःशास्ता
प्रशास्तामेघनादहा॥ब्रह्मण्यदेवोदीनानामुद्धारकरणक्षमः॥७१॥
कृष्णःकमलपत्राक्षः ॥ ५३० ॥ कृष्णःकमललोचनः॥ कृष्णः
कामीसदाकृष्णःसमस्तप्रियकारकः ॥ ७२ ॥ नंदोनंदीमहानं
दीमादीमादनकःकिली ॥ ५४० ॥ मिलीहिलीगिलीगोली
गोलोगोलालयोगुली ॥७३॥ गुग्गुलीमारकीशाखी ॥५५०॥
वटःपिप्पलकःकृती ॥ म्लेच्छहाकालहर्त्तांचयशोदायशएव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

च ॥ ७४ ॥ अच्युतःकेशवोविष्णुर्हरिः ॥ ५६० ॥ सत्यो
जनार्दनः ॥ हंसोनारायणोलीलोनीलोभक्तिपरायणः ॥७५॥
जानकीवल्लभोरामोविरामोविघ्ननाशनः ॥ ५७० ॥ सहस्रांशुर्म
हाभानुर्वीरबाहुर्महोदधिः ॥ ७६ ॥ समुद्रोब्धिरकूपारःपारावारः
सरित्पतिः ॥ गोकुलानंदकारीच ॥ ५८० ॥ प्रतिज्ञापरिपा
लकः ॥ ७७ ॥ सदारामःकृपारामोमहारामोधनुर्धरः ॥ पार्वतः
पर्वताकारोगयोगेयोद्विजप्रियः ॥ ५९० ॥ ७८ ॥ कंबलाश्व
तरोरामोरामायणप्रवर्तकः ॥ द्योदिवौदिवसोदिव्योभव्योभा
विभयापहः ॥ ७९ ॥ पार्वतीभाग्यसहितोभ्राता ॥ ६०० ॥
लक्ष्मीविलासवान् ॥ विलासीसाहसीसर्वीगर्वीगर्वितलोचनः ॥
॥ ८० ॥ मुरारिर्लोकधर्मज्ञोजीवनोजीवनांतकः ॥ ६१० ॥
यमोयमादिर्यमनोयामीयामविधायकः ॥ ८१ ॥ वसूलिःपांसुली

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पांसुःपांडुरर्जुनवल्लभः ॥ ६२० ॥ ललिताचंद्रिकामालीमा
लीमालांबुजाश्रयः ॥ ८२ ॥ अंबुजाक्षोमहायक्षोदक्षश्चिंताम
णिप्रभुः ॥ मणिर्दिनमणिश्चैवकेदारो ॥ ६३० ॥ बदरीश्रयः ॥
॥ ८३ ॥ बदरीवनसंप्रीतोव्यासःसत्यवतीसुतः ॥ अमरारिनि
हंताचसुधासिंधुर्विधूदयः ॥८४॥ चंद्रोरविःशिवःशूली ॥६४०॥
चक्रीचैवगदाधरः ॥ श्रीकर्ताश्रीपतिःश्रीदःश्रीदेवोदेवकीसुतः
॥८५॥श्रीपतिःपुंडरीकाक्षःपद्मनाभोजगत्पतिः ॥६५०॥ वासु
देवोऽप्रमेयात्माकेशवोगरुडध्वजः ॥ ८६॥ नारायणःपरंधामदेव
देवोमहेश्वरः ॥ चक्रपाणिःकलापूर्णो ॥ ६६० ॥ वेदवेद्योदया
निधिः ॥ ८७ ॥ भगवान्सर्वभूतेशोगोपालः सर्वपालकः ॥
अनन्तोनिर्गुणोऽनंतोनिर्विकल्पो ॥ ६७० ॥ निरंजनः ॥८८॥
निराधारोनिराकारोनराभासोनिराश्रयः ॥ पुरुषःप्रणवातीतो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मुकुंदःपरमेश्वरः ॥८९॥ क्षणावनिः ॥६८०॥ सार्वभौमोवैकुंठो
भक्तवत्सलः॥ विष्णुर्दामोदरःकृष्णोमाधवोमथुरापतिः ॥९०॥
देवकीगर्भसंभूतोयशोदावत्सलो ॥ ६९० ॥ हरिः ॥ शिवःसंक
र्षणःशंभुर्भूतनाथोदिवस्पतिः ॥९१ ॥अव्ययःसर्वधर्मज्ञोनिर्मलो
निरुपद्रवः ७००॥ निर्वाणनायकोनित्योनीलजीमूतसन्निभः॥
॥ ९२ ॥ कलाक्षयश्चसर्वज्ञःकमलारूपतत्परः ॥ हृषीकेशःपी
तवासावसुदेवप्रियात्मजः ॥९३॥ नन्दगोपकुमाराऱ्यो ॥७१०॥
नवनीताशनःप्रभुः ॥ पुराणपुरुषःश्रेष्ठःशंखपाणिःसुविक्रमः ॥
॥ ९४ ॥ अनिरुद्धश्चक्ररथःशार्ङ्गपाणिश्चतुर्भुजः ॥७२०॥ गदा
धरःसुरार्तिघ्नोगोविन्दोनन्दकायुधः ॥९५॥ वृंदावनचरःशौरिर्वे
णुवाद्यविशारदः॥तृणावर्तांतकोभीमसाहसोबहुविक्रमः॥७३०॥
॥ ९६ ॥ शकटासुरसंहारीबकासुरविनाशनः ॥ धेनुकासुरसं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

घातःपूतनारिर्वृकेसरिः ॥९७॥ पितामहोगरुःसाक्षीप्रत्यगात्मा
सदाशिवः ॥७४०॥अप्रमेयःप्रभुःप्राज्ञःप्रतर्क्यस्वप्नवर्धनः॥९८॥
धन्योमान्योभवोभावोधीरःशान्तो ॥ ७५० ॥ जगद्गुरुः ॥ अं
तर्यामीश्वरोदिव्योदैवज्ञोदेवतागुरुः ॥ ९९ ॥ क्षीराब्धिशयनो
धातालक्ष्मीवाल्लक्ष्मणाग्रज. ॥७६०॥ धात्रीपतिरमेयात्माचंद्र
शेखरपूजितः ॥ १०० ॥ लोकसाक्षीजगच्चक्षुः पुण्यचारित्रकी
र्तनः ॥ कोटिमन्मथसौंदर्योजगन्मोहनविग्रहः ॥ १ ॥ मंद
स्मिततमोगोपो ॥७७०॥ गोपिकापरिवेष्टितः ॥ फुल्लारवि
दनयनश्राणूरांध्रनिषूदनः ॥ २॥ इंदीवरदलश्यामोबर्हिबर्हावतं
सकः ॥ मुरलीनिनदाल्हादोदिव्यमाल्योवराश्रयः ॥ ३ ॥
सुकपोलयुगःसुभ्रूयुगलः ॥७८०॥ सुललाटकः॥ कंबुग्रीवो
विशालाक्षोलक्ष्मीवाञ्छुभलक्षणः ॥ ४ ॥ पीनवक्षाश्चतुर्बाहुश्च

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विशालाक्षलक्ष्मीपा...

तुर्मूर्तिस्त्रिविक्रमः ॥ कलंकरहितः ॥७९०॥ शुद्धोदुष्टशत्रुनिबर्हणः ॥ ५ ॥ किरीटकुंडलधरःकटकांगदमंडितः ॥ मुद्रिकाभरणोपेतःकटिसूत्रविराजितः ॥ ६ ॥ मंजीररंजितपदःसर्वाभरणभूषितः ॥ विन्यस्तपादयुगलोदिव्यमंगलविग्रहः ॥८००॥ ७ ॥ गोपिकानयनानंदःपूर्णचन्द्रनिभाननः ॥ समस्तजगदानन्दः सुंदरोलोकनंदनः ॥ ८ ॥ यमुनातीरसंचारीराधामन्मथवैभवः॥ गोपनारीप्रियोदान्तोगोपीवस्त्रापहारकः ८१० ॥ ९ ॥ शृंगारमूर्तिः श्रीधामातारकोमूलकारणम्॥ सृष्टिसंरक्षणोपायः अघासुरविभंजनः ॥ ११० ॥ नरकासुरहारीचमुरारिर्वैरिमर्दनः ॥ आदितेयप्रियो ८२० दैत्यभीकरश्चेन्दुशेखरः ॥ ११ ॥ जरासंधकुलध्वंसीकंसारातिःसुविक्रमः ॥ पुण्यश्लोकःकीर्तनीयोयादवेंद्रोजगन्नुतः ॥१२॥ रुक्मिणीरमणः ८३० सत्यभामाजांबवती

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रियः ॥ मित्रविंदानाग्नजितीलक्ष्मणासमुपासितः ॥ १३ ॥
सुधाकरकुलेजातोऽनंतबलविक्रमः ॥ सर्वसौभाग्यसंपन्नोदार
कायामुपस्थितः ॥ १४॥ भद्रा ॥८४०॥ सूर्यसुतानाथोलीला
मानुषविग्रहः ॥ सहस्रषोडशस्त्रीशोभोगमोक्षैकदायकः ॥ १५ ॥
वेदांतवेद्यः संवेद्योवैधब्रह्मांडनायकः ॥ गोवर्द्धनधरोनाथःसर्वजी
वदयापरः ॥ ८५० ॥ १६ ॥ मूर्तिमान्सर्वभूतात्माआर्तत्राणप
रायणः ॥ सर्वज्ञः सर्वसुलभःसर्वशास्त्रविशारदः ॥ १७ ॥ षड्गु
णैश्वर्यसम्पन्नः पूर्णकामोधुरंधरः ॥ माहानुभावः ८६० ॥ कैव
ल्यदायकोलोकनायकः ॥१८॥ आदिमध्यांतरहितःशुद्धसात्वि
कविग्रहः ॥ असमानसमस्तात्माशरणागतवत्सलः ॥१९॥ उत्प
त्तिस्थितिसंहारकारणंसर्वकारणम् ॥गंभीरःसर्वभावज्ञः ८७०स
च्चिदानंदविग्रहः ॥१२०॥ विष्वक्सेनःसत्यसंधःसत्यवान्सत्यवि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

च्चिदानंदावग्रहः ॥१२०॥ विष्वक्सेनःसत्यसंधःसत्यवान्सत्यवि
क्रमः ॥ सत्यव्रतःसत्यसंज्ञःसर्वधर्मपरायणः ॥२१॥ आपन्नार्तिप्र
शमनोद्रौपदीमानरक्षकः ॥८८०॥ कंदर्पजनकःप्राज्ञोजगन्नाटक
वैभवः॥२२॥भक्तिवश्योगुणातीतः सर्वैश्वर्यप्रदायकः॥ दमघोषसु
तद्वेषीबाणबाहुविखण्डनः॥२३॥ भीष्मभक्तिप्रदोदिव्यः ८९०
कौरवान्वयनाशनः॥ कौंतेयप्रियबंधुश्चपार्थस्यंदनसारथिः॥२४
नारसिंहोमहावीरस्तंबजातोमहाबलः ॥ प्रह्लादवरदःसत्योदेव
पूज्यो९०० भयंकरः॥२५॥उपेंद्रइंद्रावरजोवामनोबलिबंधनः॥
गजेंद्रवरदः स्वामीसर्वदेवनमस्कृतः॥२६॥शेषपर्यंकशयनोवैनते
यरथो ॥ ९१० ॥ जयी ॥ अव्याहतबलैश्वर्यसंपन्नःपूर्णमानसः
॥ २७ ॥ योगेश्वरेश्वरःसाक्षीक्षेत्रज्ञोज्ञानदायकः ॥ योगि
हृत्पंकजावासोयोगमायासमन्वितः ॥ ९२० ॥ २८ ॥ नाद
बिन्दुकलातीतश्चतुर्वर्गफलप्रदः ॥ सुषुम्नामार्गसंचारीदेहस्थां

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तरसंस्थितः ॥ २९ ॥ देहेन्द्रियमनःप्रणसाक्षीचेतःप्रसाद स०
कः ॥ सूक्ष्मस्सर्वगतोदेहीज्ञानदर्पणगोचरः ॥ ९३० ॥ १३० ॥
तत्त्वत्रयात्मकोव्यक्तःकुंडलीसमुपाश्रितः ॥ ब्रह्मण्यःसर्वधर्मज्ञः
शान्तोदान्तोगतक्लमः ॥ ३१ ॥ श्रीनिवासः ॥ १४० ॥
सदानंदीविश्वमूर्तिर्महाप्रभुः ॥ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्र
पात् ॥ ३२ ॥ समस्तभुवनाधारःसमस्तप्राणरक्षकः ॥ सम
स्तसर्वभावज्ञो ॥ ९५० ॥ गोपिकाप्राणवल्लभः ॥ ३३ ॥
नित्योत्सवोनित्यसौख्योनित्यश्रीर्नित्यमंगलः ॥ व्यूहार्चितो
जगन्नाथःश्रीवैकुंठपुराधिपः ॥ ३४ ॥ पूर्णानंदघनीभूतोगोपवे
षधरो ॥ ९६० ॥ हरिः ॥ कलापकुसुमश्यामःकोमलःशान्त १२
विग्रहः ॥ ३५ ॥ गोपांगनावृतोनंदोवृंदावनसमाश्रयः ॥ वेणु
वादरतःश्रेष्ठोदेवानांहितकारकः ॥ ९७० ॥ ३६ ॥ बालक्रीडास

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वादरतःश्रेष्ठोदेवानांहितकारकः ॥ ९७० ॥३६॥ बालक्रीडास
मासक्तोनवनीतस्यतस्करः ॥ गोपालकामिनीजारश्चोरजारशि
खामणिः ॥ ३७॥ परंज्योतिःपराकाशःपरावासपरिस्फुटः ॥ अ
ष्टादशाक्षरोमंत्रो ॥९८०॥ व्यापकोलोकपावनः ॥३८॥ सप्तको
टिमहामंत्रशेखरोदेवशेखरः ॥ विज्ञानज्ञानसंधानस्तेजोराशिर्जग
त्पतिः ॥ ३९ ॥ भक्तलोकप्रसन्नात्माभक्तमंदारविग्रहः॥९९०॥
भक्तदारिद्र्यदमनोभक्तानांप्रीतिदायकाः ॥ १४० ॥ भक्ताधी
नमनःपूज्योभक्तलोकशिवंकरः ॥ भक्ताभीष्टप्रदःसर्वभक्तावौघ
निकृंतनः ॥ ४१ ॥ अपारकरुणासिंधुर्भगवान्भक्ततत्परः ॥
॥ १००० ॥ ४२ ॥ इतिश्रीराधिकानाथसहस्रनामकीर्तितम् ॥
स्मरणात्पापराशीनांखंडनंमृत्युनाशनम् ॥ १ ॥ वैष्णवानांप्रिय
करंमहारोगनिवारणम् ॥ ब्रह्महत्यासुरापानंपरस्त्रीगमनंतथा ॥
॥ २ ॥ परद्रव्यापहरणंपरद्वेषसमन्वितम् ॥ मानसंवाचिकंकायं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यत्पापंपापसंभवम् ॥ ३ ॥ सहस्रनामपठनात्सर्वंनश्यतितत्क्ष
णात् ॥ महादारिद्र्ययुक्तोयोवैष्णवोविष्णुभक्तिमान् ॥ ४ ॥
कार्तिक्यांसम्पठेद्रात्रौशतमष्टोत्तरंक्रमात् ॥ पीतांबरधरोधीमा
न्सुगंधिपुष्पचंदनैः ॥ ५ ॥ पुस्तकंपूजयित्वातुनैवेद्यादिभिरेवच ॥
राधाध्यानांकितोधीरोवनमालाविभूषितः ॥ ६ ॥ शतमष्टोत्तरं
देविपठेन्नामसहस्रकम् ॥ चैत्रशुक्लेचकृष्णेचकुहुसंक्रांतिवासरे ॥
॥ ७ ॥ पठितव्यंप्रयत्नेनत्रैलोक्यंमोहयेत्क्षणात् ॥ तुलसी
मालयायुक्तोवैष्णवोभक्तितत्परः ॥ ८ ॥ रविवारेचशुक्रेचद्वादश्यां
श्राद्धवासरे ॥ ब्राह्मणंपूजयित्वाचभोजयित्वाविधानतः ॥ ९ ॥
पठेन्नामसहस्रंचततःसिद्धिःप्रजायते ॥ महानिशायांसततंवैष्णवो
यःपठेत्सदा ॥ १० ॥ देशान्तरगतालक्ष्मीःसमायातिनसंशयः ॥
त्रैलोक्येचमहादेविसुन्दर्यःकाममोहिताः ॥ ११ ॥ मूर्धाःस्वयं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रैलोक्येचमहादेविसन्दर्यःकाममोहिताः ॥ ११ ॥ मुग्धाःस्वयं
समायांतिवैष्णवंचभजंतिताः ॥ रोगीरोगात्प्रमुच्येतबद्धोमुच्ये
तबंधनात् ॥ १२ ॥ गुर्विणीजनयेत्पुत्रंकन्यार्विंदतिसत्पतिम् ॥
राजानोवश्यतांयांतिकिंपुनःक्षुद्रमानवाः ॥ १३ ॥ सहस्रनाम
श्रवणात्पठनात्पूजनात्प्रिये ॥ धारणात्सर्वमाप्नोतिवैष्णवोनात्रसं
शयः ॥१४॥ वंशीवटेचान्यवटेतथापिप्पलकेथवा ॥ कदंबपादप
तलेगोपालमूर्तिसन्निधौ ॥ १५ ॥ यःपठेद्वैष्णवोनित्यंसयातिह
रिमंदिरम् ॥ कृष्णेनोक्तंराधिकायैमयिप्रोक्तंपुराशिवे ॥ १६ ॥
नारदायमयाप्रोक्तंनारदेनप्रकाशितम् ॥ मयात्वयिवरारोहेप्रोक्त
मेतत्सुदुर्लभम् ॥ १७ ॥ गोपनीयंप्रयत्नेननप्रकाश्यंकथंचन ॥
शठायपापिनेचैवलंपटायविशेषतः ॥ १८ ॥ नदातव्यंनदातव्यं
नदातव्यंकदाचन ॥ देयंशिष्यायशान्तायविष्णुभक्तिरतायच ॥
॥ १९ ॥ गोदानब्रह्मयज्ञादेर्वाजपेयशतस्यच ॥ अश्वमेधसहस्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्यफलंपाठेभवेद्ध्रुवम् ॥ २० ॥ मोहनंस्तंभनंचैवमारणोच्चाटनादिकम् ॥ यद्यद्वांछतिचित्तेनतत्तत्प्राप्नोतिवैष्णवः ॥ २१ ॥ एकादश्यांनरःस्नात्वासुगंधिद्रव्यतैलकैः ॥ आहारंब्रह्मणेदत्वादक्षिणस्वर्णभूषणम् ॥२२॥ ततआरंभकर्ताऽसौसर्वम्प्राप्नोतिमानवः॥ शतावृत्तंसहस्रंचयःपठेद्वैष्णवोजनः ॥ २३ ॥ श्रीवृन्दावनचंद्रस्य प्रसादात्सर्वमाप्नुयात् ॥ यद्गृहेपुस्तकंदेविपूजितंचैवतिष्ठति ॥ ॥ २४ ॥ नमारीनचदुर्भिक्षंनोपसर्गभयंक्वचित् ॥ सर्पादिभूतयक्षाद्यानश्यंतिनात्रसंशयः ॥ २५ ॥ श्रीगोपालोमहादेविवसेत्तस्यगृहेसदा ॥ गृहेयत्रसहस्रंचनाम्नांतिष्ठतिपूजितम् ॥ २६ ॥

इतिश्रीसंमोहनतंत्रेपार्वतीश्वरसंवादेश्रीगोपालसहस्रनामस्तोत्रं संपूर्णम् ॥ श्रीगोपालकृष्णार्पणमस्तु ॥ उपोद्घातश्लोकाः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

संपूर्णम् ॥ श्रीगोपालकृष्णार्पणमस्तु ॥ उपोद्घातश्लोकाः ॥ २३ ॥ मूलसहस्रनामश्लोकाः ॥ १४१ ॥ फलश्रुतिश्लोकाः ॥ २६ ॥ संकलितश्लोकाः ॥ १९० ॥

॥ अथ महालक्ष्म्यष्टकस्तोत्रप्रारंभः ॥

श्रीगणेशायनमः ॥ इंद्रउवाच ॥ नमस्तेऽस्तुमहामायेश्रीपीठेसुरपूजिते ॥ शंखचक्रगदाहस्तेमहालक्ष्मिनमोस्तुते ॥ १ ॥ नमस्तेगरुडारूढेकोलासुरभयंकरि ॥ सर्वपापहरेदेविमहालक्ष्मिन० ॥ २ ॥ सर्वज्ञेसर्ववरदेसर्वदुष्टभयंकरि ॥ सर्वपापहरेदेविमहाल० ॥ ३ ॥ सिद्धिबुद्धिप्रदेदेविभुक्तिमुक्तिप्रदायिनि ॥ मंत्रमूर्त्तेसदादेविमहालक्ष्मि० ॥ ४ ॥ आद्यंतरहितेदेविआद्यशक्तिमहेश्वरि ॥ योगजेयोगसंभूतेमहाल० ॥ ५ ॥ स्थूलसूक्ष्ममहारौद्रेमहाशक्तिमहोदरे ॥ महापापहरेदेविमहाल० ॥ ६ ॥ पद्मासनस्थिते

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

देविपरब्रह्मस्वरूपिणि ॥ परमेशिजगन्मातर्महाल० ॥ ७ ॥
श्वेतांबरधरेदेविनानालंकारभूषणे ॥ जगत्स्थितेजगन्मातर्महा
ल० ॥ ८ ॥ महालक्ष्म्यष्टकंस्तोत्रंयःपठेद्भक्तिमान्नरः ॥ सर्वसि
द्धिमवाप्नोतिराज्यंप्राप्नोतिसर्वदा ॥ ९ ॥ एककालेपठेन्नित्यं
महापापविनाशनम् ॥ द्विकालंयःपठेन्नित्यंधनधान्यसमन्वितः
॥ १० ॥ त्रिकालंयःपठेन्नित्यंमहाशत्रुविनाशनम् ॥ महालक्ष्मी
र्भवेन्नित्यं प्रसन्नावरदाशुभा ॥ ११ ॥ इतींद्रकृतोमहालक्ष्म्य
ष्टकस्तवःसंपूर्णः ॥ ६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हें पुस्तक

पुरंदरे आणि कंपनीनें

"गणपत कृष्णाजी" छापखान्यांत छापिलें.

शके १८२३. सन १९०१.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ गोपालसहस्रनाम समा० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri